# गणण स्तोत्रम्

Gaṇaṇa stotram

ॐ

**Om**

**अगजाननपद्मार्कं गजाननमहर्निशम् |**

**Agajānana-padmārkaṃ**
**gajānana-maharniśam |**

**अनेकदं तं भक्तानम् एकदन्तमुपास्महे || १ ||**

**anekadaṃ taṃ bhaktānam**
**ekadantamupāsmahe ||(1)**

**शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजम् |**

**śuklāṃbaradharaṃ viṣṇuṃ**
**śaśivarṇaṃ caturbhujam |**

**प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये || २ ||**

**prasannavadanaṃ dhyāyet**
**sarva-vighnopaśāntaye ||(2)**

**वक्रतुण्ड महाकाय कटिसूर्यसमप्रभ |**

**vakratuṇḍa mahākāya**
**kaṭisūryasamaprabha |**

**निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा || ३ ||**

**nirvighnaṃ kuru me deva**
**sarvakāryeṣu sarvadā ||(3)**

**गजाननं भूत गणाधिसेवितं कपित्थ जम्बू फलसार भक्षकम् |**

**gajānanaṃ bhūtagaṇādhisevitaṃ**
**kapitthajambū phalasārabhakṣakam |**

**उमासुतं शोकविनाश कारणं नमामि विघ्नेश्वर पादपंकजम् ||४||**

**umāsutaṃ śokavināśakāraṇaṃ**
**namāmi vighneśvara pādapaṃkajam ||(4)**